# Vakratunda Stuti Brahmakrita

# બ્રહ્મકૃતા વક્રતુણ્ડસ્તુતિઃ

## Document Information

Text title : Vakratunda Stuti Brahmakrita

File name : vakratuNDastutiHbrahmakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM prathamaH khaNDaH | adhyAyaH 41 | 1.41 1-22||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

Vakratunda Stuti Brahmakrita

# બ્રહ્મકૃતા વક્રતુણ્ડસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

બ્રહ્મોવાચ ।

નમસ્તે વક્રતુણ્ડાય ગણેશાય મહાત્મને ।
અનન્તાનન્તપારાય વિઘ્નેશાય નમો નમઃ ॥ ૧॥
નમો ભક્તિપ્રિયાયૈવ ભક્તસંરક્ષકાય તે ।
અભક્તકામનાશાય સર્વદાત્રે નમો નમઃ ॥ ૨॥
નિર્ગુણાય નિરૂપાય નિર્મલાય ગુણાત્મને ।
અનન્તાનનધારાય સિંહવાહાય તે નમઃ ॥ ૩॥
અનાદિરૂપકાયૈવ નમઃ સર્વપ્રિયઙ્કર ।
વેદાન્તવેદ્યદેહાય ગજવક્ત્રાય તે નમઃ ॥ ૪॥
અનન્તોદરસંસ્થાય નાનાભોગકરાય તે ।
માયાધારાય માયાયા મોહકાય નમો નમઃ ॥ ૫॥
અમેયશક્તયે તુભ્યમનાધારાય દંષ્ટ્રિણે ।
ચતુર્બાહુયુતાયૈવ સ્વાનન્દપતયે નમઃ ॥ ૬॥
સિદ્ધિબુદ્ધિપ્રદાયૈવ સિદ્ધિબુદ્ધિધરાય ચ ।
બ્રહ્મભૂતાય દેવાય વિઘ્નહર્ત્રે નમોઽસ્તુ તે ॥ ૭॥
વક્રતુણ્ડ પ્રસન્નસ્ત્વં મહ્યં દેહિ તદાનઘ ।
ત્વદીયામચલાં ભક્તિં યયા બન્ધો ન વિદ્યતે ॥ ૮॥
ત્વદાજ્ઞયા પ્રવૃત્તોઽહં તત્ર સામર્થ્યમદ્ભુતમ્ ।
સૃષ્ટૌ દેહિ ગણાધીશ વિઘ્નહીનં ચ મે સદા ॥ ૯॥
અહં સ્રષ્ટા ચ સર્વેષાં ત્વયા પ્રોક્તો ગજાનન ।
અતસ્ત્વં પુત્રભાવેન ગૃહે મે તિષ્ઠ માયયા ॥ ૧૦॥
ત્વં સાક્ષાદ્બ્રહ્મભૂતશ્ચેદ્યદિ પુત્રો ભવિષ્યસિ ।
તદાહં બન્ધનાન્મુક્તો ભવિષ્યામિ ચ રાજસાત્ ॥ ૧૧॥
તવ માતા પિતા સ્વામિન્ બન્ધયુક્તૌ કૃતૌ યદિ ।

તદા વેદાદિકં સર્વં મિથ્યાભૂતં ભવિષ્યતિ ॥ ૧૨॥
નામગ્રહણમાત્રેણ બ્રહ્મભૂયપ્રદો ભવાન્ ।
કિં પુનઃ પુત્રભાવેન ત્વં ચેત્ સ્થાસ્યસિ મે ગૃહે ॥ ૧૩॥
અન્યચ્ચ લાલનં કુર્યાં સેવનં પૂજનં તથા ।
નિરન્તરં પ્રપશ્યેયં ભવેયમતુલસ્તતઃ ॥ ૧૪॥
બ્રહ્મણો વચનં તસ્ય શ્રુત્વા ગણપતિઃ સ્વયમ્ ।
જગાદ તં મહાભાગં હર્ષયન્ સર્વભાવવિત્ ॥ ૧૫॥
(ફલશ્રુતિઃ)
વક્રતુણ્ડ ઉવાચ ।
ત્વયા યત્ પ્રાર્થિતં બ્રહ્મન્ તદસ્તુ સકલં કિલ ।
સૃષ્ટિકતૃર્ત્વસામર્થ્યમદ્ભુતં તે ભવિષ્યતિ ॥ ૧૬॥
નિર્વિઘ્નં સર્વકાર્યેષુ મત્સ્મૃત્યા પ્રભવિષ્યતિ ।
યં યમિચ્છસિ તં તં ત્વં કામં પ્રાપ્સ્યસિ સર્વદા ॥ ૧૭॥
તવ પુત્રો ભવિષ્યામિ તારકો માયયાંશતઃ ।
વાઞ્છિતં પૂરયિષ્યામિ ભક્તિભાવેન તોષિતઃ ॥ ૧૮॥
ત્વયા કૃતમિદં સ્તોત્રં સર્વદં પ્રભવિષ્યતિ ।
મમ પ્રીતિકરં બ્રહ્મન્ બ્રહ્મભૂયપ્રદં તથા ॥ ૧૯॥
ઇત્યુક્ત્વાન્તર્દધે દક્ષ વક્રતુણ્ડઃ પ્રતાપવાન્ ।
બ્રહ્માऽપિ વિમના ભૂત્વા તત્ર વૈ સંસ્થિતોऽભવત્ ॥ ૨૦॥
વક્રતુણ્ડપ્રસાદેન નિર્મમે સકલં જગત્ ।
ચરાચરમયં સર્વં યથાયોગ્યં ચકાર હ ॥ ૨૧॥
સૃષ્ટ્વા ત્રિભુવનં સર્વં કૃતકૃત્ય ઇવાऽભવત્ ।
સ્થિતઃ સ્વસુખનિષ્ઠઃ સન્ વક્રતુણ્ડં સ સંસ્મરન્ ॥ ૨૨॥

ઇતિ બ્રહ્મકૃતા વક્રતુણ્ડસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પ્રથમઃ ખણ્ડઃ । અધ્યાયઃ ૪૧ । ૧.૪૧ ૧-૨૨॥

- .. mudgalapurANaM prathamaH khaNDaH . adhyAyaH 41 . 1.41 1-22..

Proofread by Yash Khasbage, Preeti Bhandare

*Vakratunda Stuti Brahmakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*